*Prabodhacandrodaya* *Prabodhacandrodaya* of Kṛṣṇamiśra. A drama composed A.D. 1065 for the victory celebrations of King Kīrtivarman and his general Gopāla over the armies of Karṇadeva; 6th ed., V. L. Paṇśīkar, *NSP*. 1935.

*Pracaṇḍapāṇḍava* *Pracaṇḍapāṇḍava* of Rājaśekhara, ed. Carl Capeller, Strassburg, 1885.

*Pratāparudrayaśobhūṣaṇa* *Pratāparudrayaśobhūṣaṇa* of Vidyānātha; a Kākaṭīya court work on poetics (for King Pratāparudra 1295–1323); ed. K. P. Trivedi, Bombay, 1909.

*Pt.* *Padyataraṅgiṇī* of Vrajanātha; from the *pratīka* index by N. A. Gore, *Poona Orientalist*, vol. 11, pp. 45–56.

*Pv.* *Padyaveṇī*, an anthology by Veṇīdatta (A.D. 1644), son of Jagajjīvana (whose *Jagajjīvana-vrajyā* is cited by the son); ed. J. B. Chaudhuri, Calcutta, 1944.

*RA.* *Rāmacaritam* of Abhinanda, son of Śatānanda (both cited in *V*); ninth century Pāla court poet; ed. K. Rāmaswāmi Śāstrī Śiromaṇi; *GOS*. 46, Baroda, 1930.

*Rāj.* *Rājataraṅgiṇī* of Kalhaṇa (A.D. 1149–50); ed. M. A. Stein (1892) and English translation, *Chronicles of the Kings of Kaśmīr*, 2 vol., London, 1900. A model of linguistic and archaeological research.

*Rasapradīpa* *Rasapradīpa* of Prabhākara, son of Mādhava; MS. *BORI*. 764/1886–92, dated Saṃvat 1891.

*Rasg.* *Rasagaṅgādhara* of Jagannātha, *KM*. 12, 2nd ed., *NSP*. 1894.

*Rasm.* *Rasamañjarī* of Bhānudatta (14th century); *Benares Skt. Series* 83, 1904. Also *Kāvyasaṃgraha*, vol. 3, pp. 360–441.

*Rast.* *Rasataraṅgiṇī* of Bhānudatta, Bombay, Gopal Narayan (year lost with frontispiece); also used *BORI*. 603/1887–91, and an edition from Benares, 1885.

*Rat.* *Ratnāvalī*, a drama by King Harṣa; ed. K. M. Joglekar, *NSP*. 1938. *Kpk*. 8. 9 and commentary is sometimes taken to mean that the actual writer was the court poet Dhāvaka, or Bāṇa.

*RC.* *Rāma[pāla]-carita* of śrī Sandhyākaranandin (son of Pinākanandin, grandson of Prajāpatinandin); ed. with Skt. commentary and English interpretation by R. C. Majumdar, R. Basak, and N. Banerji; Varendra Research Museum, Rajshahi 1939. Earlier and less satisfactory edition by Haraprasād Śāstrī, *Memoirs, ASB*. vol. 3, 1910–14, no. 1, pp. 1–56. The work gives a double meaning for every stanza, one referring to the classical epic of Rāma, the other to the history of King Rāmapāla. Where a commentary of the time exists (for one and a half cantos), some meaning can be obtained; for the greater part, the historical sense can only be conjectured. Written *circa* A.D. 1150 under King Madanapāla, son and third successor of Rāmapāla. The author styles himself Kali-kāla-Vālmīki.

*Sa.* *BORI*. 1498/1886–92. MS (dated Saṃvat 1609) anthology entitled the *Subhāṣitārṇava*, sometimes attributed to the Jain Ācārya Śubhacandra.

*Sab.* *Sabhyālaṃkaraṇa* of Bhaṭṭa Govindajit. MS anthology *BORI*. 417/1884–87.

*Śāk.* *Abhijñāna-Śākuntalam*, a drama by Kālidāsa; 11th ed. *NSP*. 1947. For the Bengal recension, R. Pischel, *HOS*. 16 (1922).

*Śān.* *Śāntiśataka* ascribed to Śilhaṇa or Śilhaṇamiśra, undoubtedly a compilation as is seen in most versions. For the critical problem, ed. R. Schoenfeld, Leipzig,

1910; also used, ed. Dīnānātha Nyāyaratna and Candramohan Vandyopādhyāya, undated, *circa* 1880, Calcutta; and the version in the *Kāvyasaṃgraha*.

*ŚB.* *Śṛṅgāraprakāśa* of Bhoja; the largest known Sanskrit work on poetics, including everything in the *Skb;* unpublished, the references being from *pratīka* slips very kindly supplied by Prof. V. Raghavan.

*Sb.* A MS collection (anonymous) of *subhāṣitas*, *BORI*. 91/1883–84; fol. 1 missing, 2–22 in Śāradā script, 23–42 in Devanāgarī; mostly *nīti* type stanzas, parallel to *Sbh.*

*Sbh.* *Subhāṣitāvalī*, published as of Vallabhadeva; ed. P. Peterson and Durgā Prasāda, Bombay, 1886. But this is identical with the *Subhāṣitāvalī* of Śrīvara, *BORI*. 203 and 204 of 1875–76. Anthologist, Kaśmīrian of the fifteenth century.

*Sd.* *Sāhitya-darpaṇa* of Viśvanātha Kavirāja, 5th ed. *NSP*, 1931.

*SG.* *Subhāṣitāvalī* of Gopīnātha, MS anthology, *BORI*. 820/1886–92.

*Shv.* *Subhāṣita-hārāvalī* of Hari Kavi, *circa* 1685, by a court poet of the Marāṭhā king Sambhājī. MS *BORI*. 92/1883–84, heterogeneous codex made up of several pieces, which I have taken as four instead of Thomas' three. Authors often cited.

*Śiś.* *Śiśupālavadha*, a poem in twenty cantos by Māgha; ed. Durgāprasād and Śivadatta, 11th ed. N. R. Acharya, *NSP*, 1940.

*SK.* *Subhāṣitaratnakośa* of bhaṭṭa-śrī-Kṛṣṇa. MS anthology, incomplete; *BORI*. 93/1883–84, the first 155 folios only.

*Skb.* *Sarasvatīkaṇṭhābharaṇa*, a work on poetics by King Bhoja of Dhārā (later subsumed in *ŚB.*); ed. A. Borooah, Calcutta, 1883; used *KM*. 94, *NSP*, 1934, which has an index and commentary.

*Skv.* *Sāhityakaumudī* of Vidyābhūṣaṇa, *KM*. 63.

*Sl.* An anonymous MS anthology, probably Mahārāṣṭrian; *BORI*. 324/A of 1881–82, fol. 22 + 38.

*Slp.* *Śṛṅgārālāpa*. MS anthology on *śṛṅgāra* which lifts bodily from well-known works like *Han*, and has one section made up of a northern Bhartṛhari *śṛṅgāraśataka*. *BORI*. 92/1883–84.

*Smk.* *Sūktimuktāvalī* of Ārohaka Bhagadatta Jalhaṇa; ed. Embar Kṛṣṇamācārya, *GOS.* 82, Baroda, 1938.

*Smv.* Another *Sūktimuktāvalī* (before A.D. 1600), P. K. Gode, *IHQ*, 1946, pp. 55–59; from a *pratīka* index kindly supplied by Prof. R. N. Dandekar, Poona.

*Śp.* The *Paddhati* of Śārṅgadhara, vol. I (the rest never appeared); ed. P. Peterson, *Bomb. Skt. Series 37*, Bombay, 1888. The anthologist was son of Dāmodara, grandson of Rāghava, great-grandson of Hammīra Bhūpati of Śākambharī; composed the work in A.D. 1363.

*Srb.* *Subhāṣitaratnabhāṇḍāgāra*, the largest published or known Sanskrit anthology, 8th edition, *NSP*, 1952. As the sources are all well known, this has not been cited systematically, but is recommended to the reader as a handy, modern, general collection of *subhāṣitas*.

*Srh.* *Sūktiratnahāra* of Sūrya, a Malabarian anthology; ed. K. Sāmbaśiva Śāstrī, *TSS.* 141, Trivandrum, 1938.

*Śṛt.* *Śṛṅgāratilaka*, attributed to Kālidāsa, and printed as his with the *Ṛtusaṃhāra*, *NSP*, 1931 (7th ed. V. L. Paṇśīkar); the work of Rudraṭa with the same title, *KM.* 3, pp. 111–152, has not been found useful here.

*Ssm.* *Ślokasaṃgraha* of Maṇirāma Dīkṣita, court poet of Rājā Ṭoḍar Mal. Unpublished, from *BORI.* 361/1884–86 (lacuna between stanzas 190–204, 1454–1496). Another MS *BORI.* 527/1887–91 with the initial folio missing but otherwise better was not available at the time. Authors generally cited, and stanzas numbered 1–1600 (or more).

*Ssv.* A MS anthology, entitled *Sārasūktāvalī*, compiled by the Jain scholar śrī Municandra Gaṇi, written down by Pt. Śivahaṃsa in Saṃvat 1650; prototype of most Jain *subhāṣita* collections.

*St.* *Sabhātaraṅga* of Jagannātha Miśra, second half of eighteenth century. Unpublished, from *BORI.* 416/1884–87, which seems less interpolated than the other MSS of the work; authors often cited.

*Sūryaśataka* *Sūryaśataka* of Mayūra, *KM.* 19, *NSP*, 1889; other editions by A. P. Quackenbos, N.Y., 1947, and in the *Kāvyasaṃgraha.*

*Svapnavāsavadatta* *Svapnavāsavadatta*, a drama attributed to Bhāsa; 2nd ed. *TSS.* 1915.

*Svt.* *Suvṛttatilaka* of Kṣemendra, *KM.* 2, pp. 29–54; 2nd ed. *NSP*, 1932.

*Tāp.* *Tāpasavatsarāja*, a dramatic fragment ascribed to Anaṅgaharṣa śrī-Mātrarāja (our Malayarāja); ed. Udayagiri Yatirāja Sampatkumāra Rāmānuja Muni of Melkoṭe, Bangalore, 1929; beginning and end missing. Author probably a Kaśmīrian, son of śrī Narendravardhana; *cf.* Hultzsch, "Ueber d. Drama Tap.", *Gött. Nach.*, 1886.

*Tār.* *Tāranātha's Geschichte des Buddhismus in Indien*, aus dem Tibetischen übersetzt, von Anton Schiefner, St. Petersburg, 1869.

*Tilakamañjarī* *Tilakamañjarī* of Dhanapāla, a prose romance, end of tenth century. *KM.* 85, 2nd ed., *NSP*, 1938.

*TSS.* *Trivandrum Sanskrit Series.*

*Udayasundarīkathā* *Udayasundarīkathā* of Soḍḍhala; *GOS.* 11, Baroda, 1920.

*Uj.* *Ujjvalanīlamaṇi* of Rūpa Gosvāmin (author of *PG*). *KM.* 95, 2nd ed. *NSP*, 1932.

*Ut.* *Uttararāmacarita*, a drama by Bhavabhūti; 10th ed. *NSP*, 1949.

*Vām.* *Kāvyālaṃkārasūtravṛtti* of Vāmana. *KM.* 15, 3rd ed. *NSP*; the superior 4th edition by Pt. N. R. Acārya was issued too late to be used; also, A. Borooah, Calcutta, 1883.

*VA.* *Vāgbhaṭālaṃkāra*, *KM.* 48, a work on poetics by Vāgbhaṭa (not to be confused with the later author of *Kvv.*), Jain minister of the Cālukya king Jayasiṃha Siddharāja of Anhilvāḍ (A.D. 1094–1143).

*Vās.* *Vāsavadattā* of Subandhu, prose romance; ed. Fitz Edward Hall, *Bibliotheca Indica*, Calcutta, 1859.

*Veṇ.* *Veṇisaṃhāra*, a drama in six acts by Bhaṭṭa Nārāyaṇa; 9th ed. *NSP*, 1940.

*Vid.* *Viddhaśālabhañjikā*, a drama by Rājaśekhara; ed. B. R. Arte, Poona, 1886.

*Vik.* *Vikramorvaśīyam*, a drama by Kālidāsa; ed. *NSP*, 1942.

*Vikramāṅkadevacarita* *Vikramāṅkadevacarita*, a Sanskrit romantic poem on the life of King Vikramāṅkadeva of Kalyāṇī, written about A.D. 1088 by the Kaśmīrian poet Bilhaṇa; ed. G. Bühler, *Bombay Skt. Series* 14, 1875; copied with

innumerable misprints, Rāmāvatāra Śarmā, Banāras, 1922.

*Vkj.* *Vakrokti-jīvita* of Rājānaka Kuntala (or Kuntalaka, or Kuntaka), first two *unmeṣas* only (parts of 3, 4 in MS) ed. S. K. De, Calcutta, 1923; author's date "about the middle of the 11th century."

*Vmm.* *Vidagdha-mukha-maṇḍana* of Dharmadāsa, from the *Kāvyasaṃgraha.*

*Vyk.* *Vyaktiviveka*, a work on poetics by Rājānaka Mahimabhaṭṭa; *Kāśī Skt. Series*, 121; Banāras, 1936.

# THE SUBHĀṢITARATNAKOṢA

विद्याकरग्रथितः

# सुभाषितरत्नकोषः ॥

नमो बुद्धाय ।

नानाकवीन्द्रवचनानि मनोहराणि N. 1b K. 1a 1 T. 1
संख्यावतां परमकण्ठविभूषणानि ।
आकम्पकानि शिरसश्च महाकवीनां
तेषां समुच्चयमनर्घमहं विधास्ये ॥ १ ॥

## ॥ सुगतव्रज्या ॥ १ ॥

आबाहूद्धतमण्डलाग्ररुचयः संनद्धवक्षःस्थलाः 2 T. 2
सोष्माणो व्रणिनो विपक्षहृदयप्रोन्माथिनः कर्कशाः ।
उत्सृष्टाम्बरदृष्टविग्रहभरा यस्य स्मराग्रेसरा
मारा मारवधूस्तनाश्च न दधुः क्षोभं स वोऽव्याज्जिनः ॥ १ ॥

**अश्वघोषस्य ॥**

नम्राः पादनखेषु यस्य दशसु ब्रह्मेशकृष्णास्त्रयस् 3 T. 3
ते देवाः प्रतिबिम्बनात्रिदशतां सुव्यक्तमापेदिरे ।
स त्रैलोक्यगुरुः सुदुस्तरभवाकूपारपारंगतो
मारव्यूहजयप्रगल्भसुभटः शास्ता तव स्तान्मुदे ॥ २ ॥

**वसुकल्पस्य ॥**

कामक्रोधौ द्वयमपि पदं प्रत्यनीकं वशित्वे (4) T. 4 S. 1.49.1
हत्वानङ्गं किमिव हि रुषा साधितं त्र्यम्बकेण ।
यस्तु क्षान्त्या शमयति शतं मन्मथाद्यानरातीन्
कल्याणं वो दिशतु स मुनिग्रामणीरर्कबन्धुः ॥ ३ ॥

**संघश्रियः ॥**

---

No heading in N K T1; T2 कवीन्द्रवचनसमुच्चयः। K benediction ॐ नमः श्रीदेव्यैः ॥ नमो नारायणाय। Vrajyā rubrics in N om. ततः; in K always ततो, irrespective of saṃdhi requirements; N marks Vrajyā endings only by ॥ ○ ॥. Neither Vrajyās nor stanzas numbered in N, K, or P.

**1** — b) K °कर्णविभूषणानि. **2** — c) K °दृप्तविग्रह-. — d) T2 वारवधू-. ○ Sbh. 74; Subhāṣ 1. (9 *a*); Jayaratha ad As. p. 95; Vām. ad 4.3.7. **3** — b) T प्रव्यक्त°. — c) T1 वसुकस्य; K om. **4** — a) T S यदि (पदं). S प्रसिद्धं (वशित्वे). — b) T S2.3 त्र्यम्बकेन; S1 कामुकेन (त्र्यंबकेण). — c) S मन्मथादीन्.

5 T. 5 श्रेयांसि वः स सुगतः कुरुतादपार-
संसारसागरसमुत्तरणैकसेतुः ।
दुर्वारमारपरिवारबलावलेप-
कल्पान्तसंततपयःप्रसरैरहार्यः ॥ ४ ॥

अपराजितरक्षितस्य ॥

6 T. 6 शास्ता समस्तभुवनं भगवानपायात्
पायादपास्ततिमिरो मिहिरोपमेयः ।
संसारभित्तिभिदुरो भवकन्दकन्दु-
कन्दर्पदर्पदलनव्यसनी मुनीन्द्रः ॥ ५ ॥

वसुकल्पस्य ॥

7 T. 7 S. 1.49.3 कारुण्यामृतकन्दलीसुमनसः प्रज्ञावधूमौक्तिक-
ग्रीवालंकरणश्रियः शमस↑रित्पूरोत्सलच्छीकराः । ↑K. 1b
ते मौलौ भवतां मिलन्तु जगतीराज्याभिषेकोचित-
स्रग्भेदा अभयप्रदानचरणप्रेङ्खन्नखाग्रांशवः ॥ ६ ॥

8 T. 8 S. 1.49.4 शीलाम्भःपरिषेकशीतलदृढध्यानालवालस्फुरद्-
दानस्कन्धमहोन्नतिः पृथुतरप्रज्ञोल्लसत्पल्लवः ।
देयात्तुभ्यमवार्यवीर्यविटपः क्षान्तिप्रसूनोदयः
सुच्छायः षडभिज्ञकल्पविटपी संबोधिबीजं फलम् ॥ ७ ॥

एतौ श्रीधरनन्दिनः ॥

(9) T. 9 एकस्यापि मनोभुवस्तदबलापाङ्गैर्जगन्निर्जये
कामं निह्नुतसर्वविस्मयरसव्यक्तिप्रकारा वयम् ।
यस्त्वेनं सबलं च जेतुमभितस्तत्कम्पमात्रं भ्रुवोर्
नारेभे सुगतस्तु तद्गुणकथा स्तम्भाय नः केवलम् ॥ ८ ॥

कुमुदाकरमतेः ॥

---

**6** — [c]) K °भिदुरोद्भव-. T कंदकंद-. **7** — [b]) S °पूरोच्छलच्-. **8** — [c]) S °प्रसूनोद्गमः. — [d]) K स्वच्छायः. — [e]) K °नन्दनः. **9** — [b]) T1 कार्यं (कामं).

प्रत्येकानन्तजातिप्रतिवपुरमितावृत्तिजन्मार्जितैनो- 10 T. 10
भोक्तृत्रातोज्जिहीर्षाफलनिलयमहापौरुषस्यापि शास्तुः ।
केऽप्युत्कर्षं स्तुवन्ति स्मरमपि जयतस्तद्वदामः किमस्मिन्
यो भस्मासीत्कटाक्षज्वलनकणिकया द्रागुमाकामुकस्य ॥ ९ ॥

वल्लणस्य ॥

पायाद्वः समयः स मारजयिनो वन्ध्यायितास्त्रोत्करः (11) T. 11
क्रोधाद्यत्र तदुत्तमाङ्ककवलोन्मीलन्महाविक्रमः ।
आसीदद्भुतमौलिरत्नमिलितां व्यात्ताननच्छायिकाम्
आलोक्यात्मन एव मारसुभटः पर्यस्तधैर्योदयः ॥ १० ॥

श्रीपाशवर्मणः ॥

खेलाचञ्चलसंचरन्निजपदप्रेङ्खोललीलामिलत्- 12 T. 12
सद्यःसान्द्रपरागरागरचितापूर्वप्रसूनश्रियः ।
आश्लिष्यन्मधुलम्पटालिनिवहस्योच्चैर्मिथश्चुम्बनैर्
व्याकोषः कुसुमाञ्जलिर्दिशतु वः श्रेयो जिनायार्पितः ॥ ११ ॥

जि↑तारिनन्दिनः ॥ ↑K. 1*b*

दरोन्मुक्तारक्तस्फुरदधरवीथीक्रमवमन्- 13 T. 13
मयूखान्तर्मूर्च्छद्द्युतिदशनमुद्देशवशिनः ।
सुखं तद्वः शास्तुर्दिशतु शिवमज्ञानरजनी-
व्यवच्छेदोद्गच्छन्महिमघनसंध्यातप इव ॥ १२ ॥

त्रि↑लोचनस्य ॥ ↑N. 2*a*

कन्दर्पादपि सुन्दराकृतिरिति प्रौढोत्सलज्जागया 14 T. 14
वृद्धत्वं वरयोषितोऽनयदिति त्रासाकुलस्वान्तया ।
मारस्यापि शरैरभेद्यहृदिति श्रद्धाभरप्रह्वया
पायाद्वः स्फुटबाष्पकम्पपुलकं रत्या जिनो वन्दितः ॥ १३ ॥

तस्यैवेति श्रुतिः ॥

---

**10** — [a]) T प्रत्येकानेक-. **11** — [a]) T वन्ध्योऽपितास्त्रोत्करः (T2 °त्रासोत्कटः). — [b]) T ममा(T2 °नो)विक्रमः. — [c]) T °मिलित-. — [d]) K आलोक्यात्स्मर. **13** — [d]) K °संध्यात्रप.

15 T. 15 S. 1.49.2 पादाम्भोजसमीपसंनिपतितस्वर्णाथदेहस्फुरन्-
नेत्रस्तोमतया परिस्फुटमिलन्नीलाब्जपूजाविधिः ।
वन्दारुत्रिदशौघरत्नमुकुटोद्भूतप्रभापल्लव-
प्रत्युन्मीलदपूर्वचीवरपटः शाक्यो मुनिः पातु वः ॥ १४ ॥
वसुकल्पस्य ॥

16 T. 16 क एकस्त्वं पुष्पायुध मम समाधिव्ययविधौ
सुपर्वाणः सर्वे यदि कुसुमशस्त्रास्तदपि किम् ।
इतीवैनान्नूनं य इह सुमनोऽस्त्रत्वमनयत्
स वः शास्ता शस्त्रं दिशतु दशदिङ्मारविजयी ॥ १५ ॥

॥ इति सुगतव्रज्या ॥ १ ॥

## ॥ ततो लोकेश्वरव्रज्या ॥ २ ॥

17 T. 17 द्युतिस्वच्छज्योत्स्नापटपटलवृष्ट्या न कमलं
न चन्द्रः सान्द्रश्रीपरिमलगरिम्णास्यममलम् ।
मधूद्राणां निद्राभिदुरमपमुद्राद्भुतमुदश्
चकोरान् बिभ्राणं सरसिरुहपाणेरवतु वः ॥ १ ॥
बुद्धाकरगुप्तस्य ॥

18 T. 18 वरदकरसरोजस्यन्दमानामृतौघ-
व्युपशमितसमस्तप्रेतसंघाततर्षः ।
जयति सितगभस्तिस्तोमशुभ्राननश्रीः
सहजगुरुदयार्द्रालोकनो लोकना↑थः ॥ २ ॥ ↑K. 2a
रत्नकीर्तेः ॥

19 T. 19 अत्युद्गाढरयस्थिराकृतिघनध्वानभ्रमन्मन्दर-
क्षुब्धक्षीरधिवीचिसंचयगतप्रालेयपादोपमः ।↑ ↑T. 2b
श्रीमत्पोतलके गभीरविवृतिध्वानप्रतिध्वानिते
सान्द्रस्वांशुचयश्रिया वलयितो लोकेश्वरः पातु वः ॥ ३ ॥
ज्ञानश्रीमित्रस्य ॥

---

**15** — [c]) S °मुकुटोत्सर्पत्. **17** — [c]) T2 मधुद्राणां. — [e]) N बुद्धाकरस्य; T °गुप्तानां. **19** — [a]) T प्रत्युद्गाढ-. — [d]) K सान्द्रस्वाश्र°.

कृपावृष्टिस्फीतात्तव हृदयपीयूषसरसः 20
प्रवाहो निर्गत्य क्रमतनिमरम्यः करुणया ।
तृषार्तानामीषद्वितितिमधुरान्तःप्रतिगति-
प्रणालीभिः पञ्चाभवदिति किमन्यद्भुजकरात् ॥ ४ ॥

त्रिलोचनस्य ॥

रविमिव धृतामिताभं कविमिव सुरसार्थविरचितस्तोत्रम् । 21
मधुमिव संभृतकरुणं विधुमिव नाथं खसर्पणं वन्दे ॥ ५ ॥

पुरुषोत्तमदेवस्य ॥

उदरस्येद[म]णुत्वं सहजगुरुत्वं यदि नेदं हृदयस्य । (22)
स्वार्थे कथमलसत्वं कथमनुसत्वं हितकरणे मतिरस्य ॥ ६ ॥

ज्ञानश्रीमित्रस्य ॥

वक्त्रं नैष कलानिधिर्धवलिमा नैषोज्ज्वला कौमुदी 23
नेत्रे नीलरुची न लाञ्छनयुगं चन्द्रेऽस्त्यमन्दच्छवि ।
इत्युन्नीय विधोरभीतिविहसद्यत्संनिधिं साध्वगान्
नूनं नीरजमस्तु वः शिवदिवे तल्लोकनाथाननम् ॥ ७ ॥

जटाजूटाभ्यन्तर्नवरविरिव श्यामजलभृद्- 24
वृतः शोणाशोकस्तवकममिताभः प्रमिनुते ।
महर्षेर्यस्येन्दुद्युतिघटितमूर्तेरिव स वः
क्लमं भिन्द्याद्दद्यात्प्रशमसुखपीयूषलहरीम् ॥ ८ ॥

बुद्धाकरस्यैतौ ॥

॥ इति लोकेश्वरव्रज्या ॥ २ ॥

## ॥ ततो मञ्जुघोषव्रज्या ॥ ३ ॥

अङ्गामोदसमोच्छलद्घृणिपतद्भृङ्गावलीमा↑लित- ↑ N. 2b 25
स्फूर्जल्लाञ्छनसूत्रगुम्फितमिलन्नी↑लोत्पलश्रीरिव । ↑ K. 3a
निर्यत्पादनखोन्मुखांशुविसरस्रग्दन्तुरः स्मर्यतां
मञ्जुश्रीः सुरमुक्तमञ्जरिशिखावर्षैरिवाभ्यर्चितः ॥ १ ॥

---

**23** — d) K °दल्लोक°. **24** — e) K पंडितबुद्धाकरगुप्तस्यैतौ. **25** — b) N has some extra letter after °रिव.

26 शस्त्रोद्यद्बाहुदेहस्फुरदनलमिलद्धूमकल्पान्तपुञ्जः
शृङ्गान्तानन्तविश्वार्पितमहिषशिरोमक्षिकालीविकल्पः ।
त्रासत्यक्तस्वपर्णास्तृतसुरघृणयेवालसत्पादवृन्दस्
तारौघप्लुष्टभानुर्जगदवतु नटन्भैरवात्मा कुमारः ॥ २ ॥
वल्लणस्यैतौ ॥

27 खड्गी सशब्दमथ पुस्तकवान्सचिन्तं बालः सखेलमभिरामतमः सकामम् ।
नानाविधं सुरवधूभिरितीक्षितो वः पायाच्चिरं सुगतवंशधरः कुमारः ॥ ३ ॥
पुरुषोत्तमस्य ॥

(28) मुग्धाङ्गुलीकिशलयांह्रिसुवर्णकुम्भ-
वान्तेन कान्तिपयसा घुसृणारुणेन ।
यो वन्दमानमभिषिञ्चति धर्मराज्ये
जागर्तु वो हितसुखाय स मञ्जुवज्रः ॥ ४ ॥
जितारिपादानाम् ॥

29 अमीषां मञ्जुश्रीरुचिरवदनश्रीकृतरुचां
श्रुतं नो नामापि क नु खलु हिमांशुप्रभृतयः ।
ममाभ्यर्णे धाष्ट्याच्चरति पुनरिन्दीवरमिति
क्रुधेवेदं प्रान्तारुणमवतु वो लोचनयुगम् ॥ ५ ॥
शान्ताकरगुप्तस्य ॥

॥ इति मञ्जुघोषव्रज्या ॥ ३ ॥

## ॥ ततो महेश्वरव्रज्या ॥ ४ ॥

30 S. 1.4.1 (वसुकल्पदत्तस्य) P. 2a (वसुकल्पदत्तस्य) शिल्पं त्रीणि जगन्ति यस्य कविता यस्य त्रिवेदी गिरो
यश्चक्रे त्रिपुरव्ययं त्रिपथगा यन्मूर्ध्नि माल्यायते ।
त्रीन् लोकानिव वीक्षितुं वहति यो विस्फूर्जदक्ष्णां त्रयं
स त्रैगुण्यपरिच्छदो विजयते देवस्त्रिशूलायुधः ॥ १ ॥
वसुकल्पस्य ॥

---

**26** — [c]) K त्रासत्य कुस्वपत्रा (?). **28** — [a]) K मुग्धामुली-. ○ Dedication of जातिनिराकरण by Jitāri; ed. G. Tucci, *ABORI*. 11. 1930. p. 55. **30** — [a]) S गुरोर्. — [c]) S त्रीन्कालानिव. S3 अक्षित्रयं.

वाणीभूतपुराणपूरुषधृतिप्रत्याशया धाविते 31 S. 1.15.4
निद्रातिस्फुरदाशुशुक्षणिकणक्लान्ते शकुन्ते↑श्वरे । ↑ K. 3b
नम्रोन्नम्रभुजंगपुङ्गवगुणव्याकृष्टबाणासन-
क्षिप्तास्त्रस्य पुरद्रुहो विजयते सन्धानसीमाश्रमः ॥ २ ॥

पीयूषद्रवपानदोहदरसव्यग्रोरगग्रामणी- 32 P. 18b (anon)
दष्टः पातु शशी महेश्वरशिरोनेपथ्यरत्नाङ्कुरः ।
यो बिम्बप्रतिपूरणाय विधृतो निष्पीड्य संदंशिका-
यन्त्रे शैवललाटलोचनशिखाज्वालाभिरावर्ध्यते ॥ ३ ॥
मुरारेरेतौ ॥

भद्रं चन्द्रकले शिवं सुरनदि श्रेयः कपालावले 33 P. 7b (anon)
कल्याणं भुजगेन्द्रवल्लि कुशलं विश्वे शटासन्तते ।
इत्याहुर्मिलिताः परस्परममूर्यस्मिन् प्रशान्तिं गते
कल्पान्तारभटीनटस्य भवतात्तद्वः श्रिये ताण्डवम् ॥ ४ ॥

देवि त्वद्वदनोपमानसुहृदामेषां सरोजन्मनां 34 P. 10b (शितिकण्ठस्य)
पश्य व्योमनि लोहितायति शनैरेषा दशा वर्तते ।
इत्थं संकुचदम्बुजानुकरणव्याजोपनीताञ्जलेः
शम्भोर्वञ्चितपार्वतीकमुचितं संध्यार्चनं पातु वः ॥ ५ ॥
राजशेखरस्य ॥

कस्मात्पार्वति निष्ठुरासि, सहजः शैलोद्भवानामयं, 35 S. 1.7.1 (भोजदेवस्य) P. 6.a
निःस्नेहासि कथं, न भस्मपुरुषः स्नेहं बिभर्ति क्वचित् ।
कोपस्ते मयि निष्फलः प्रियतमे, स्थाणौ फलं किं भवेद्
इत्थं निर्वचनीकृ↑तो गिरिजया शंभुश्चिरं पातु वः ॥ ६ ॥ ↑ N. 3a

---

**31** — [a]) S धारिते. — [b]) S निद्रातीक्षणजाशु-. — [d]) N पुरुद्रुहो. — [e]) K बाणस्य. ○ Anr. 7.114 — [b]) विद्राति°; Smk. 1.4 (श्रीमुरारेः). **32** — [c]) K शण्डंसिका-. — [e]) K मुरारेः. **33** — [b]) P विश्वक् जटा-. — [d]) P भवताद्वः श्रेयसे. ○ Smk. 2.35; Shv. A. 12b. **34** K omits most ञ on this folio. — [c]) P संपुटदंबु-. — [d]) K °कमुभितं. ○ ŚB. 3.89. **35** — [a]) S सहजं. S इदं (अयं). — [b]) SP कुतो न भस्म प(P °पु°)रुषः स्नेहं कचिद्विं(S1. 2 °न्नि°)दति. — [d]) SP शंभुः शिवायास्तु वः.

36 S. 1.95.1 (मुञ्जस्य) P. 3a (रावणस्य) वपुःप्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे न प्रायः क्वचिदपि भवन्तं प्रणतवान् ।
नमन्न् जन्मन्यस्मिन्नहमतनुरग्रेऽप्यनतिभाङ्
महेश क्षन्तव्यं तदिदमपराधद्वयमपि ॥ ७ ॥

(37) किं वाच्यो महिमा महाजलनिधेर्यस्येन्द्रवज्राहतस्
त्रस्तो भूभृदमज्जदम्बुनिचये कौलीलपोताकृतिः । ↑K. 4a
मैनाकोऽपि गभीरनीरविलुठन् पाठीनपृष्ठोच्छल-
च्छैवालाङ्कुरकोटिकोटरकुटीकुड्यान्तरे निर्वृतः ॥ ८ ॥

38 S. 1.3.3 तादृक्सप्तसमुद्रमुद्रितमही भूभृद्भिरभ्रंकषैस्
तावद्भिः परिवारिता पृथुपृथुद्वीपैः समन्तादियम् ।
यस्य स्फारफणामणौ निलयनान्मज्जत्कलङ्काकृतिः
शेषः सोऽप्यगमद्यदङ्गदपदं तस्मै नमः शंभवे ॥ ९ ॥

[एतौ] वल्लणस्य ॥

(39) S. 1.13.2 (भवभूतेः) P. 10.a (भवभूतेः) गाढग्रन्थिप्रफुल्लद्गलविकलफणापीठनिर्यद्विषाग्नि-
ज्वालानिस्तप्तचन्द्रद्रवदमृतरसप्रोषितप्रेतभावाः ।
उज्जृम्भा बभ्रुनेत्रद्युतिमसकृदसृक्तृष्णयालोकयन्त्यः
पान्तु त्वां नागनालग्रथितशवशिरःश्रेणयो भैरवस्य ॥ १० ॥

तस्यैव ॥

40 P. 3a (बिभीषणस्य) बभ्रुभ्रूश्मश्रुकेशं शिखरमिव गिरेर्लग्नदावाग्निमालं
नेत्रैः पिङ्गोग्रतारैस्त्रिभिरिव रविभिश्छिद्रितः कालमेघः ।
दंष्ट्राचन्द्रप्रभाभिः प्रकटितसुबृहत्तालुपातालमूलं
शंभोर्वक्त्रं सुवक्त्रत्रितयभयकरं हन्त्वघं दक्षिणं वः ॥ ११ ॥

रक्षोविभीषणस्य ॥

---

**36** — [a]) $S_1$ वपुनः; $S_{2,3}$ पुनः (वपुः). — [c]) K नमन्मुक्त- ○ Smk. 133.12 (अपराधसुंदरस्य); Kuv. p. 137; Shv.A.25a. 30; Kpk. 501; SK. 1.17; KHV. 567. **37** (= 1208). — [b]) K °कृती । — [d]) K कुल्यन्तरे. ○ Any. p. 98.47; Śp. **1096** (बधिरकवेः); Srb.p.216.31. **38** — [a]) $S_3$ °भूभृद्भिर्. — [c]) S °तिर्यक् (मज्जत्). — [e]) N om. एतौ; K एता. ○ Srb.p.6.80. **39** — [a]) $S_{1,2}$ °पीड-. — [b]) S °निष्टप्त-. — [c]) $S_1$ बभ्रुनेत्रा. K °सकृत्रसृ-. — [d]) K नागलाल-. **40** — [a]) K °भूश्मश्रु-. — [b]) P रविभिश्चित्रितः. — [c]) K दंष्ट्रा चंद्र-. P प्रकलित-. — [d]) KP सुवक्त्रं. K भवभयहरणं; P त्रितयभयहरं. K दाक्षिणं.

उद्दामदन्तरुचिपल्लवितार्धचन्द्र- 41
ज्योत्स्नानिपीततिमिरप्रसरोपरोधः । S. 1.8.2
श्रेयांसि वो दिशतु ताण्डवितस्य शंभोर् (श्रीसंघमित्रस्य)
अम्भोधरावलिघनध्वनिरट्टहासः ॥ १२ ॥
राजगुरुसंघश्रियः ॥

त्वङ्गद्गङ्गमुदश्चदिन्दुशकलं भ्रश्यत्कपालावलि 42
क्रोडभ्राम्यदमन्दमारुतरयस्फारीभवद्भांकृति । S. 1.9.1
पायाद्वो घनताण्डवव्यतिकरप्राग्भारखेदस्खलद्- (वीर्यमित्रस्य)
भोगीन्द्रश्लथपिङ्गलोत्कटजटाजूटं शिरो धूर्जटेः ॥ १३ ॥ P. 19.a

नखदर्पणसंक्रान्तप्रतिमादशकान्वितः । ↑ K. 4b 43
गौरीपादानतः शंभुर्जयत्येकादशः स्वयम् ॥ १४ ॥ P. 6b (भासस्य)

चूडापीडकपालसंकुलपतन्मन्दाकिनीवारयो 44
विद्युत्प्रायललाटलोचनपुटज्योतिर्विमिश्रत्विषः ।
पान्तु त्वामकठोरकेतकशिखासंदिग्धमुग्धेन्दवो
भूतेशस्य भुजङ्गवल्लिवलयस्रङ्नद्धजूटा जटाः ॥ १५ ॥
भवभूतेः ॥

स जयति गाङ्गजलौघः शंभोरुत्तुङ्गमौलिविनिविष्टः । 45
मज्जति पुनरुन्मज्जति चन्द्रकला यत्र शफरीव ॥ १६ ॥ S. 1.10.2 P. 5b

स वः पायादिन्दुर्नवबिसलताकोटिकुटिलः 46
स्मरारेर्यो मूर्ध्नि ज्वलनकपिशे भाति निहितः । S. 1.11.1
स्रवन्मन्दाकिन्याः प्रतिदिवससिक्तेन पयसा (राजशेखरस्य)
कपालेनोन्मुक्तः स्फटिकधवलेनाङ्कुर इव ॥ १७ ॥ P. 18b

---

**41** — [b]) S1.2 प्रकरोप-; S3 प्रकराव-. **42** — [a]) K °वली-. — [b]) P क्रोडे. S °मारुतचय-. K °भांकृर्तिं; P भांकृतिः. — [c]) S1.2 P °खेलस्खलद्-. — [d]) K °जटाकूटं. **43** — [a]) P °संक्रांति-. — [b]) P दर्शका-. **44** — [e]) K श्रीभवभूतेः. ○ Māl. 1.1; Srb. p. 9.120. **45** — [a]) S3 गांगतरंगः. **46** — [b]) K °कपिले; P °कठिने. ○ As. ad 21; Cit. p. 85; Amd. 731; Vām. ad 4.3.9.

47 S. 1.11.5 (वररुचेः) P. 9b (कालिदासस्य), 19a

च्युतामिन्दोर्लेखां रतिकलहभग्नं च वलयं
द्वयं चक्रीकृत्य प्रहसितमुखी शैलतनया ।
अवोचद्यं पश्येत्यवतु स शिवः सा च गिरिजा
स च क्रीडाचन्द्रो दशनकिरणापूरिततनुः ॥ १८ ॥

48* S. 1.3.2 (बाणस्य) P. 10a (रक्षोरावणस्य)

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शंभवे ॥ १९ ॥

(49) S. 1.16.1 (अमरुकस्य)

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।
आलिङ्गन्योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स हरतु दुरितं शांभवो वः शराग्निः ॥ २० ॥
बाणस्य ॥

50 S. 1.20.5 P. 7b

संध्याताण्डवडम्बरव्यसनिनो भीमस्य चण्डभ्रमि-
व्यावृत्यद्भुजदण्डमण्डलभुवो झंझानिलाः पान्तु वः ।
येषामुच्छलतां जवेन झगिति व्यूहेषु भूमीभृताम्
उड्डीने↑षु बिडौजसा पुनरसौ दम्भोलिरालोकितः ॥ २१ ॥ ↑N. 3b

(51) P. 17b

केशेषु प्राक्प्रदीपस्त्वचि विकटचटत्कारसारोऽतिमात्रं
मां↑से मन्दायमानः क्षरदसृजि सृजन्नस्थिषु ध्वात्कृतानि । ↑K. 5a
मज्जप्रायेऽङ्गभागे झगिति रतिपतेर्जाज्वलन्प्रोज्ज्वलश्रीर्
अश्रेयो व्यस्यताद्वस्त्रिनयननयनोपान्तवान्तो हुताशः ॥ २२ ॥

---

**47** — [a]) P1 विभोश्चूडाचन्द्रं. — [b]) P1 चैकीकृत्य ; P2 सज्जीकृत्य. — [c]) P1 °त्संपश्य. — [d]) SP पूरितकलः (S1 marg °तनुः P2 °करः). ○ Śp 96 (क्रीडाचन्द्रस्य); Sbh. 66 (चन्दकस्य); KHV. 435; Bps.2; Skb. 5.112; ŚB 1.432; 3.224; Sb. 8b; SK. 1.12; Srb. p. 5.48. **48** ○ Har. 1.1; Smk. 1.1 (भट्टबाणस्य); Śp. 60 (बाणभट्टस्य); Sbh. 8 (भट्टबाणस्य); Sb. 2a (भट्टबाणस्य), SK. 1.21; Amd. 697; ŚB. 2.88, 2.433; Srb. p.3.1. **49** : The ascription to Bāṇa may be a survival of the lost 48. — [c]) S1 आश्लिष्यन्. — [d]) S स दहतु. ○ Amś. 2; Dhv. ad. 2.5; Daś. ad. 4.28 (अमरुशतके); KHA. 194; Skb. 1.189, 5.499; ŚB. 2.237, 2.393; Kpk. 341; Kpd. p. 273; Aś. p. 26 (ad. 10.5); Sd. ad 7.31; Amd. 493; BIS. 2018 (786); Vyk. ad 1.95; Srb. p. 8 109; Nāṭ. ad 125. **50** — [c]) P यत्रेन झटिति. ○ Smk. 2.31 (सोमनाथप्रशस्तेः); Śp. 109 (सोमनाथप्रशस्तेः); Shv. A. 13 a (सोमनाथप्रशस्तेः); SG. 1.30 (सोमनाथप्रशस्तेः); Srb. p. 10.152. **51** K corrupt. — [a]) P सारोत्रिमात्रं. — [b]) P स्फुरदसृजि. — [c]) P झटिति रतिपरे. P ज्वालनश्रीर्. — [d]) P अश्रेयांसि स्यताद्वस. K पांतरांतो.

पायात्पार्वणसांध्यताण्डवविधौ यस्योल्लसत्काननो 52
हेमाद्रिः करणाङ्गहारवलनैः सार्धेन्दुरान्दोलितः ।
धत्तेऽत्यद्भुतविस्मयेन धरया धृतस्य कान्तत्विषो
लोलत्कुन्तलकुण्डलस्य शिरसः शोभां स वो धूर्जटिः ॥ २३ ॥

कपाले गम्भीरः कुहरिणि जटासंधिषु कृशः (53) S. 1.10.1
समुत्तालश्चूडाभुजगफणरत्नव्यतिकरे । (योगेश्वरस्य) P. 11a
मृदुर्लेखाकोणे रयवशविलोलस्य शशिनः (योगेश्वरस्य)
पुनीयाद्दीर्घं वो हरशिरसि गङ्गाकलकलः ॥ २४ ॥

शान्त्यै वोऽस्तु कपालदाम जगतां पत्युर्यदीयां लिपिं (54) S. 1.13.1
क्वापि क्वापि गणाः पठन्ति पदशो नेतिप्रसिद्धाक्षराम् । (कस्यचित्) P. 4b
विश्वं स्रक्ष्यति रक्षति क्षितिमपामीशिष्यते शिष्यते (राजशेखरस्य)
नागैः रागिषु रंस्यते स्यति जगन्निर्वेक्ष्यति द्यामिति ॥ २५ ॥

भोजदेवस्य ॥

ज्वालेवोर्ध्वविसर्पिणी परिणतस्यान्तस्तपस्तेजसो (55)
गङ्गातुङ्गतरङ्गसर्पवसतिर्वल्मीकलक्ष्मीरिव । S. 1.12.1 (रविनागस्य) P. 10a
संध्येवार्द्रमृणालकोमलतनोरिन्दोः सहस्थायिनी (वीरनागस्य)
पायाद्वस्तरुणारुणांशुकपिशा शंभोर्जटासंहतिः ॥ २६ ॥

मौलौ वेगादुदञ्चत्यपि चरणभरन्यञ्चदुर्वीतलत्वाद् (56) S. 1.3.1
अक्षुण्णस्वर्गलोकस्थितिमुदितसुरज्येष्ठगोष्ठीस्तुताय ।
संत्रासान्निःसरन्त्याप्यविरतविसरद्दक्षिणार्धानुबन्धाद्
अत्यक्तायाद्रिपुत्र्या त्रिपुरहरजगत्क्लेशहन्त्रे नमस्ते ॥ २७ ॥

बाणस्य ॥

---

**53** — [a]) K कपोले. — [b]) SP समुत्तान-. S °मणिबंध-. (°फणरत्न-). — [c]) P नयवश-. — [d]) S पुनीताद्. P गंगाजलकणः **54** — [b]) SP नातिप्र-. — [c]) S वक्ष्यति (रक्षति). KS3 ऽशिष्यते. — [d]) S1, 2 नागश्रोणिषु; S3P नागान्नागिषु. K रंस्यति. ○ ŚB 2.36; Skb. 4.216. **55** — [b]) SP गंगातोय-. — [d]) S °कपिला. P °संततिः. ○ Kun. 1.2 (as in S). **56** — [b]) S3 °सुरश्रेष्ठ-. — [c]) S3 विषजद्दक्षिणार्धांग-. — [d]) S3 °हर्त्रे.

(57) पर्यङ्काश्लेषबन्धद्विगुणितभुजगग्रन्थिसंवीतजानोर्
अन्तःप्राणावरोधादुपरतसकलध्यानरुद्धेन्द्रियस्य । † K. 5b
आत्मन्यात्मानमेव व्यपगतकरणं पश्यतस्तत्त्वदृष्ट्या
शंभोर्वः पातु शून्यक्षणघटितलयब्रह्मलग्नः समाधिः ॥ २८ ॥

(58) पायाद्वारेन्दुमौलेरनवरतभुजावृत्तिवातोर्मिवेग-
भ्राम्यद्रुद्राक्षतारागणरचितमहालातचक्रस्य लास्यम् ।
न्यञ्चद्भूत्सर्पदग्निस्खलदखिलगिरित्वङ्गदुत्तालमौलि-
स्फूर्जच्चन्द्रांशुनिर्यन्नयनरुचिरसज्जाह्नवीनिर्झरं वः ॥ २९ ॥

59 S. 1.8.3 (योगेश्वरस्य) P. 11b
मातर्, जीव, किमेतदञ्जलिपुटे तातेन गोपायितं,
वत्स स्वादु फलं, प्रयच्छति न मे, गत्वा गृहाण स्वयम् ।
मात्रैवं प्रहिते गुहे विघटयत्याकृष्य संध्याञ्जलिं
शंभोर्भग्नसमाधिरुद्धरभसो हासोद्गमः पातु वः ॥ ३० ॥

(60) S. 1.6.1 (योगेश्वरस्य)
एवं स्थापय सुभ्रु बाहुलतिकामेवं कुरु स्थानकं
नात्युच्चैर्नम कुञ्चयाग्रचरणौ मां पश्य तावत्क्षणम् ।
एवं नर्तयतः स्ववक्त्रमुरजेनाम्भोधरध्वानिना
शंभोर्वः परिपान्तु नर्तितलयच्छेदाहतास्तालिकाः ॥ ३१ ॥

61 S. 1.15.3 P. 2b (चित्तपस्य)
संव्यानांशुकपल्लवेषु तरलं वेणीगुणेषु स्थिरं
मन्दं कञ्चुकसंधिषु स्तनतटोत्संगेषु दीप्तार्चिषम् ।
आलोक्य त्रिपुरावरोधनवधूवर्गस्य धूमध्वजं
हस्तस्रस्तशरासनो विजयते देवो दयार्द्रेक्षणः ॥ ३२ ॥

मयूरस्य ॥

---

**57** — [d]) K °पटित° ○ Mṛc. 1.1 — [a]) °ग्रंथिबंध-. °भुजगाश्लेष- — [d]) शून्येक्षण-; Srb. p. 8.112. **58** — [c]) K °तुङ्गङ्गनदुत्ताल-. **59** — [a]) SP मातर्ब्रूहि- — [b]) S3 P प्रयच्छसि- — [d]) S1 (var.). °समाधिबंध-. SP °मनसो हास्योद्गमः ○ Sbh. 69 (चन्दकस्य); ŚB. 3.37; Srb. p. 7.94. **60** — [d]) S सुखयन्तु (S1 var. परिपांतु)लंभित-. — [e]) S1 तस्यैव (*sic*) योगेश्वरस्य. ○ Kav. p. 38. **61** — [a]) P संध्याभांशुक-. K चरणं; P तरुणी- (तरलं). P °वार्णागुणेषु. S स्थिनं. — [c]) P वधूवृंदस्य. — [d]) P श्रस्त-.

जटागुल्मोत्संगं प्रविशति शशी भस्मगहनं 62 P. 6a
फणीन्द्रोऽपि स्कन्धादवतरति लीलाञ्चितफणः ।
वृषः शाठ्यं कृत्वा विलिखति खुराग्रेण नयनं
यदा शंभुश्चुम्बत्यचलदुहितुर्वक्त्रकमलम् ॥ ३३ ॥
**राजशेखरस्य ॥**

नानावेगविनिःसृतत्रिपथगावारिप्रवाहाकुलः (63)
शीघ्रभ्रान्तिवशाल्ललाटनयनाकालात[पा]द्भीषणः ।
मुण्डालीकुहर↑प्रसर्पदनिलास्फालप्रमुक्तध्वनिः ↑K. 6a
प्रावृट्काल इवोदितः शिवशिरोमेघः शिवायास्तु वः ॥ ३४ ॥

स पातु विश्वमद्यापि यस्य मूर्ध्नि नवः शशी । 64 P. 14a (anon)
गौरीमुखतिरस्कारलज्जयेव न वर्धते ॥ ३५ ॥
**धर्मपालस्य ॥**

दिग्वासा इति सत्रपं मनसिजद्वेषीति मुग्धस्मितं (65) P. 2a
साश्चर्यं विषमेक्षणोऽयमिति च त्रस्तं कपालीति च ।
मौलिस्वीकृतजाह्नवीक इति च प्राप्ताभ्यसूयं हरः
पार्वत्या सभयं भुजङ्गवलयीत्यालोकितः पातु वः ॥ ३६ ॥
**विनयदेवस्य ॥**

फणिनि शिखिग्रहकुपिते शिखिनि च तद्देहवलयिताकुलिते । 66
अवताद्वो हरगुहयोरुभयपरित्राणकातरता ॥ ३७ ॥
**जातार्धवर्धनस्य ॥**

सिन्दूरश्रीर्ललाटे कनकरसमयः कर्णपार्श्वेऽवतंसो (67) S. 1.16.2 P. 2b (सुभाङ्गस्य)
वक्त्रे तांबूलरागः पृथुकुचकलशे कुङ्कुमस्यानुलेपः ।
दैत्याधीशाङ्गनानां जघनपरिसरे लाक्षिकक्षौमलक्ष्मीर्
अश्रेयांसि क्षिणोतु त्रिपुरहरशरोद्गारजन्मानलो वः ॥ ३८ ॥
**मङ्गलस्य ॥**

---

**65** — [b]) K नियमेक्षणो; P विषमक्षणो. **67** — [a]) S P कर्णपाशे. — [b]) P °स्यानुरागः ।. — [c]) K क्षोम-. — [d]) K अश्रेयांसं°.

(68) S. 1.20.4 (ब्रह्महरेः) P. 14a (anon)

पायाद्वः सुरजाह्नवीजलरयभ्राम्यज्जटामण्डली-
वेगव्याकुलनागनायकफणाफूत्कारवातोच्छलत्- ।
सप्ताम्भोनिधिजन्मचण्डलहरीमज्जन्नभोमण्डल-
त्रासत्रस्तसुराङ्गनाकलकलक्रीडाविलक्षो हरः ॥ ३९ ॥

कर्कराजस्य ॥

(69)

पुरस्तादानम्रत्रिदशपतिगारुत्मतमणेर्
वतंसत्रासार्तेरपसरति मौञ्जीफणिपतौ ।
पुरारिः संवृण्वन् विगलदुपसंव्यानमजिने
पुनीताद्वः स्मेरक्षितिधरसुतापाङ्गविषयः ॥ ४० ॥

धर्माशोकस्य ॥

(70)

जीर्णेऽप्युत्कटकालकूटकवले दग्धे हठान्मन्मथे
नीते भासुरभालनेत्रतनुतां कल्पान्तदावानले ।
यः शक्त्या समलंकृतोऽपि शशिनं श्रीशैलजां स्वर्धुनीम् ↑K. 6b
धत्ते कौतुकराजनीतिनिपुणः पायात्स वः शंकरः ॥ ४१ ॥

कविराजस्य ॥

॥ इति श्रीमहेश्वरव्रज्या ॥ ४ ॥

## ॥ ततस्तद्गणव्रज्या ॥ ५ ॥

(71) S. 1.32.3 P. 22b

देवी सूनुमसूत नृत्यत गणाः किं तिष्ठतेत्युद्भुजे
हर्षाद्भृङ्गिरिटावयाचितगिरा चामुण्डयालिङ्गिते ।
अव्याद्वो हतदेवदुन्दुभिघनध्वानातिरिक्तस्तयोर्
अन्योन्यप्रचलास्थिपञ्जररणत्कङ्कालजन्मा रवः ॥ १ ॥

योगेश्वरस्य ॥

---

**68** — a) S सुरदीर्घिका-. — c) K °सज्जन्. — d) S3 ग्रासत्रस्त. P सुरार्दनाकनगर-. S °क्रीडा-. P °विलक्षा. **69** — a) K may be दानत्त-. **70** — e) K कवीराजस्य ॥. ○ Han. 9.36; Srb. p. 6.78. Vrajyā **5** : N om. this Vrajyā, which is developed in K by adding to 75, 83–86, 89, 90, 93, 94, 100–102. K calls this शिवगणव्रज्या at the end. **71** — a) P °त्युद्भुतं. — b) S भृंगरिटा-. S °लिंगितः. — c) SP हतदुन्दुभिध्वनि (S3 °स्वन°, P °ध्वन°) घनध्वाना. — d) S3 °कंकार. ○ Smk. 2.55; Kav. p. 18, p. 65; Skb. 4.176; ŚB. 2.345.

रक्षतु वः स्तनयुगलं हरिकरिकुम्भानुकारि गिरिदुहितुः । (72) P. 22b (दक्षस्य)
शंकरदृढकण्ठग्रहपीडनभस्माङ्गरागविच्छुरितम् ॥ २ ॥

सावष्टम्भनिशुम्भसंभ्रमनमद्भूगोलनिष्पीडन- (73)
न्यञ्चत्कर्परकूर्मकम्पविचटद्ब्रह्माण्डखण्डस्थिति ।
पातालप्रतिमल्लगल्लविवरप्रक्षिप्तसप्तार्णवं
वन्दे नन्दितनीलकण्ठपरिषद्व्यक्तर्द्धि वः क्रीडितम् ॥ ३ ॥

भो भो दिक्पतयः प्रयात परतः खं मुञ्चताम्भोमुचः (74) S. 1.19.3 (योगेश्वरस्य) P. 11a
पातालं व्रज मेदिनि प्रविशत क्षोणीतलं क्ष्माभृतः ।
ब्रह्मन्नुन्नय दूरमात्मसदनं देवस्य मे नृत्यतः
शंभोः संकटमेतदित्यवतु वः प्रोत्सारणा नन्दिनः ॥ ४ ॥

स्वेदस्ते कथमीदृशः प्रियतमे, त्वन्नेत्रवह्नेर्विभो, 75 S. 1.24.1 P. 19.b (anon)
कस्माद्वेपितमेतदिन्दुवदने, भोगीन्द्रभीतेर्भव ।
रोमाञ्चः कथमेष देवि, भगवन् गङ्गाम्भसां शीकरैर्
इत्थं भर्तरि भावगोपनपरा गौरी चिरं पातु वः ॥ ५ ॥
लक्ष्मीधरस्य ॥

आर्द्रां कण्ठे मुखाब्जस्रजमवनमयत्यम्बिका जानुलम्बां (76) S. 1.19.1 P. 10a
स्थाने कृत्वेन्दुलेखां निबिडयति जटाः पन्नगेन्द्रेण नन्दी ।
कालः कृत्तिं निबध्नात्युपनयति करे ↑ कालरात्रिः कपालम् ↑K 7a
शंभोर्नृत्यावतारे परिषदिति पृथग्व्यापृता वः पुनातु ॥ ६ ॥
शतानन्दस्य ॥

शृङ्गं भृङ्गिन् विमुञ्च त्यज गजवदन त्वं च लाङ्गूलमूलं (77) S. 1.32.4 (अभिनन्दस्य) P. 13b (anon)
मन्दानन्दोऽसि नन्दिन्नलमबल महाकाल कण्ठग्रहेण ।
इत्युक्त्वा नीयमानः सुखयतु वृषभः पार्वतीपादमूले
पश्यन्नक्षैर्विलक्षं वलितगलचलत्कम्बलं त्र्यम्बकं वः ॥ ७ ॥

---

**72** — [b]) P om हरि. **73** — [c]) K °प्राक्षिप्त-. ○ Māl. 5.22. — [b]) विगलद्. — [d]) व्यक्तं तव क्रीडितं. **74** — [c]) SP नो (मे). — [d]) K प्रोत्सारिना. ○ Smk. 2.30 (महानाटकात्); Śp. 108 (महानाटकात्). **75** — [a]) P प्रभो (विभो). — [b]) S कस्मात्कंपित-. ○ Śp. 104; SK. 1.45. **76** — [a]) P स्रजमुपरिनयल्ल°. — [b]) P बालामर्धे°. SP जटाः. — [c]) K शतनंदस्य. ○ Smk. 2.29; Shv. A. 12b. **77** — [a]) P लांगूलमुच्चैर्. — [c]) S1.2 °मूलैः; P °मूलं — [d]) S3 °गतिचलत्. K कुंबलं; P °कंबलम्.

(78) S. 1.10.4 गौरीविभज्यमानार्धसंकीर्णे हरमूर्धनि ।
अम्ब द्विगुणगम्भीरे भागीरथि नमोऽस्तु ते ॥ ८ ॥

(79) देवस्याम्बुजसंभवस्य भवनादम्भोधिमागामुका
सेयं मौलिविभूषणं भगवतो भर्गस्य भागीरथी ।
उद्यातानपहाय विग्रहमिह स्रोतःप्रतीपानपि
स्रोतस्तीव्रतरत्वरा गमयति द्राग्ब्रह्मलोकं जनान् ॥ ९ ॥

(80) P. 21b प्रातः कालाञ्जनपरिचितं वीक्ष्य जामातुरोष्ठं
कन्यायाश्च स्तनमुकुलयोरङ्गुलीभस्मसमुद्राः ।
प्रेमोल्लासाज्जयति मधुरं सस्मिताभिर्वधूभिर्
गौरीमातुः किमपि किमपि व्याहृतं कर्णमूले ॥ १० ॥

शुभाङ्गस्य ॥

(81) S. 1. 22.2 (कस्यचित्) P. 21a (दक्षप्रजापतेः) लाक्षारागं हरति शिखराज्जाह्नवीवारि येषां
ये तन्वन्ति श्रियमधिजटामण्डलं मालतीनाम् ।
यात्युत्सर्पद्विमलकिरणैर्यैस्तिरोधानमिन्दुर्
देव्याः स्थाणौ चरणपतिते ते नखाः पान्तु विश्वम् ॥ ११ ॥

दक्षस्य ॥

(82) S. 1.28.4 (भगीरथस्य) P. 22a (भगीरथस्य) मिश्रीभूतां तव तनुलतां बिभ्रतो गौरि कामं
देवस्यासीदविरलपरीरम्भजन्मा प्रमोदः ।
किं तु प्रेमस्तिमितमधुरस्निग्धमुग्धा न दृष्टिर्
दृष्टेत्यन्तःकरणमसकृत्ताम्यति त्र्यम्बकस्य ॥ १२ ॥

83 P. 24b (anon) अव्याद्वो वलिताङ्घ्रिपातविचलद्भूगोलहेलोन्मुख-
भ्राम्यद्दिक्करिकल्पितानुकरणो↑ नृत्यन् गणग्रामणीः । ↑K. 7b
यस्योद्दण्डितशुण्डपुष्करमरुद्व्याकृष्टसृष्टं मुहुस्
ताराचक्रमुदक्तशीकरपृषल्लीलामिवाभ्यस्यति ॥ १३ ॥

राजशेखरस्य ॥

---

**78** ○ Anr. 7.118 — [b]) संकीर्ण- ; Smk. 1.24. **79** — [cd]) K श्रोतः-. ○ Anr. 7.119; Smk. 105.2 (श्रीमुरारेः). **80** — [c]) P सर्वाभिर् (वधू°). ○ Smk. 1.22. **81** — [b]) S स्रजमधि-. — [c]) S प्रत्युत्सर्पद्. P दशनकिरणैर्. S इन्दोर्. **82** — [b]) S देवस्य स्याद्. **83** — [a]) P °तांघ्रिभार-. — [d]) K °मदक्त-; P °मुदग्र-.

सानन्दं नन्दिहस्ताहतमुरजरवाहूतकौमारबर्हि- 84*
त्रासान्नासाग्ररन्ध्रं विशति फणिपतौ भोगसंकोचभाजि ।
गण्डोड्डीनालिमालामुखरितककुभस्ताण्डवे शूलपाणेर्
वैनायक्यश्चिरं वो वदनविधुतयः पान्तु चीत्कारवत्यः ॥ १४ ॥
भवभूतेः ॥

यदम्बा तातो वा द्वयमिदमगादेकतनुताम् 85 P. 26b (मण्डनस्य)
तदर्धं चार्धं च क्व नु गतमथार्यः कथयतु ।
जगत्तत्तज्जातं सकलनरनारीमयमिति
प्रतीतिं कुर्वाणो जयति शिखिभर्तुर्गजमुखः ॥ १५ ॥

भवजलधिजलावलम्बयष्टिर्महिषमहासुरशैलवज्रधारा । 86 S. 1.22.3 (भगीरथदत्तस्य) P. 20a
हरहृदयतडागराजहंसी दिशतु शिवं जगतश्चिरं भवानी ॥ १६ ॥
भगीरथस्य ॥

शूलाहतमहिषासुररुधिरच्छुरिताधराम्बरा गौरी । (87) P. 23a
पुष्पवतीव सलज्जा हसितहरनिरीक्षिता जयति ॥ १७ ॥
गोनन्दस्य ॥

प्रत्यासन्नविवाहमङ्गलविधौ देवार्चनन्यस्तया (88) S. 1.23.2 (भासस्य) P. 22a
दृष्ट्वाग्रे परिणेतुरेव लिखितां गङ्गाधरस्याकृतिम् ।
उन्मादस्मितरोषलज्जितमसौ गौर्या कथंचिच्चिराद्
वृद्धस्त्रीवचनात्प्रिये विनिहितः पुष्पाञ्जलिः पातु वः ॥ १८ ॥

शिखिपतिरतिदुर्ललितः पित्रो↑रभिलषति मध्यमधिशयितुम् । ↑N. 4.a 89 P. 23b (शुभाङ्गस्य)
तावप्येकशरीराविति विषमाशश्चिरं जयति ॥ १९ ॥

---

**84** — c) N quite illegible. ○ Māl. 1.2; SK. 1.4; SG. 1.49; Srb. p. 3.35; Guṇaratna 1; Śp. 91 (भवभूतेः). **85** — a) P द्वयमयम्. — c) P जगज्जातं तच्चेत्. — d) K प्रतीतं. **86** — d) S भवतश्चिरं. **87** — b) P शोणित- (रुधिर-). K om °धरा°. **88** — a) S (var. as in text) °व्यस्तया. — c) SP °रसैर्गौर्या (S1 °र्याः). ○ Smk. 2.37 (श्रीहर्षस्य); Śp. 102; SG. 1. 41; Srb. p. 12.28. **89** — a) P शिखिगति°. P °दुर्ललितः. — d) K विषमांश°.

90 P. 23b (राजशेखरस्य)

अम्बेयं नेयमम्बा न हि खरकपिशं श्मश्रु तस्या मुखार्धे
तातोऽयं नैष तातः स्तनमुरसि पितुर्दृष्टवान्नाहमत्र ।
केयं कोऽयं किमेतद्युवतिरथ पुमान् वस्तु किं स्यात्तृतीयं,
शंभोः संवीक्ष्य रूपादपसरति गुहः शङ्कितः पातु युष्मान् ॥ २० ॥

(91) S. 1.30.1 (बाणस्य) P. 23b (बाणस्य)

स्वेच्छारम्यं लुठित्वा पितुरुरसि चिताभस्मधूलीचिताङ्गो
गङ्गावारिण्यगाधे झटिति हरजटाजूटतो दत्तझम्पः ।
सद्यः शीत्कारकारी↑ जलजडिमरणद्दन्तपङ्क्तिर्गुहो वः ↑K. 8a
कम्पी पायादपायाज्ज्वलितशिखिशिखे चक्षुषि न्यस्तहस्तः ॥ २१ ॥

(92) S. 1.30.4 (बलभद्रस्य) P. 23b (कविशेखरस्य)

हंसश्रेणिकुतूहलेन कलयन् भूषाकपालावलीं
बालामिन्दुकलां मृणालरभसादान्दोलयन्पाणिना ।
रक्ताम्भोजधिया च लोचनपुटं लालाटमुद्घाटयन्
पायाद्वः पितुरङ्कभाक् शिशुजनक्रीडोन्मुखः षण्मुखः ॥ २२ ॥

93 S. 1.29.2 P. 26b (वसुदत्तस्य)

कपोलादुड्डीनैर्भयवशविलोलैर्मधुकरैर्
मदाम्भःसंलोभादुपरि पतितुं बद्धपटलैः ।
चलद्बर्हच्छत्रश्रियमिव दधानोऽतिरुचिराम्
अविघ्नं हेरम्बो भवदघविघातं घटयतु ॥ २३ ॥
वसुकल्पस्य ॥

94 S. 1.29.1 P. 25a (anon)

एकः स एव परिपालयताज्जगन्ति
गौरीगिरीशचरितानुकृतिं दधानः ।
आभाति यो दशनशून्यमुखैकदेश-
देहार्धहारितवधूक इवैकदन्तः ॥ २४ ॥
तस्यैव ॥

---

**90** P order *bacd*. — [b]) P पितुर्नैव दृष्टं कदाचित् ।. — [c]) P कोयं केयं. P किं वा. — [d]) P रूपं संवीक्ष्य पित्रोर्. ○ SK. 6.1. **91** — [a]) S त्रिरं (चिता-). P °सितांगो. Smk. 2.43 (बाणस्य); Shv. A. 15*a* (श्रीबाणस्य). **92** — [a]) P °लावलिं. — [c]) S3 लोचनयुगं. — [d]) K °जनः क्रीडा-. — [e]) S3 जलचन्द्रस्य. **93** — [b]) P मदारंभैर्लोभा-. — [c]) P चलद्भृंगं. P दधानाति-. — [d]) S जगदघ-. P रचयतु. — [e]) K om. but has तस्यैव after 94. **94** — [a]) P °ज्जयंति. — [c]) S1 °देशं. — [d]) P °हालित-.

अर्चिष्मन्ति विदार्य वक्त्रकुहराण्यासृक्कणो वासुकेस्
तर्जन्या विषकर्बुरान् गणयतः संस्पृश्य दन्ताङ्कुरान् ।
एकं त्रीणि नवाष्ट सप्त षडिति व्यस्तास्तसंख्याक्रमा
वाचः शक्तिधरस्य शैशवकलाः कुर्वन्तु वो मङ्गलम् ॥ २५ ॥ (95) S. 1.30.2 (कस्यचित्) P. 24a (गोवर्धनस्य)

सुप्तं पक्षपुटे निलीनशिरसं दृष्ट्वा मयूरं पुरः
कृत्तं केन शिरोऽस्य तात कथयेत्याक्रन्दतः शैशवात् ।
सान्तर्हासपिनाकिपाणियुगलास्फालोल्लसच्चेतसस्
तन्मूर्धेक्षणतर्पितस्य हसितं पायात्कुमारस्य वः ॥ २६ ॥ (96) S. 1.30 3 P. 25a

चर्चायाः कथमेष रक्षति सदा सद्योनृमुण्डस्रज
चण्डीकेशरिणो वृषं च भुजगान् सूनोर्मयूरादपि ।
इत्यन्तः परिभावयन् भगवतो दीर्घं धियः कौशलं
कूष्माण्डो धृतिसंभृतामनुदिनं पुष्णाति तुन्दश्रियम् ॥ २७ ॥ ↑K 8b (97) S. 1.32.2 (कस्यचित्)

कस्मात्त्वं, तातगेहाद्, अपरमभिनवा ब्रूहि का तत्र वार्ता,
देव्या देवो जितः, किं, वृषडमरुचिताभस्मभोगीन्द्रचन्द्रान् ।
इत्येवं बर्हिनाथे कथयति सहसा भर्तृभिक्षाविभूषा-
वैगुण्योद्वेगजन्मा जगदवतु चिरं हा-रवो भृङ्गरीटेः ॥ २८ ॥ (98) S. 1 31.2 (तुङ्गोकस्य) P. 26a (तुङ्गोकस्य)

तुङ्गस्यैतौ ॥

स्थूलो दूरमयं न यास्यति, कृशो नैष प्रयाणक्षमस्
तेनैकस्य ममैव तत्र कशिपुप्राप्तिः परा दृश्यते ।
इत्यादौ परिचिन्तितं प्रतिमुहुस्तद्भृङ्गिकूष्माण्डयोर्
अन्योन्यप्रतिकूलमीशशिवयोः पाणिग्रहे पातु वः ॥ २९ ॥ (99) S. 1.32.1 (तुङ्गोकस्य)

ज्याकृष्टिबद्धखटकामुखपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसंवलितोऽम्बिकायाः ।
त्वां पातु मञ्जरितपल्लवकर्णपूर-
लोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः ॥ ३० ॥ 100 S. 1.25.3 (अमरोः)

अचलसिंहस्य ॥

---

**95** — a) S3 °सृक्वतो. — d) S नो (वो). ○ Smk. 2.42 (बाणस्य); Śp. 105; Daś. ad 3.20. **96** — b) S3 P कथमित्या°. P शैशवाः. — c) S अंतर्हास-. S °युगलस्फा-; P युगलोत्ता°. — d) S °क्षणहर्षितस्य. **97** — d) K तुण्डश्रियम् ॥. **98** — b) P देवोर्जितः. — c) P विभूषो. — d) P वैगुण्याद्वेग-. S3 भृंगिरीटेः. **99** — a) S3 प्रयातुं. S1.2 क्रमस. — b) S परं (परा). — c) K भृङ्ग°. **100** — a) K °पाणिपृष्ठे. ○ Amś. 1.

101 S. 1.1.5 P. 22a (चित्तपस्य)

मातस्तेऽधरखण्डनात्परिभवः कापालिकाद्योऽभवत्
स ब्रह्मादिषु कथ्यतामिति मुहुर्बाल्याद्गुहे जल्पति ।
गौरीं हस्तयुगेन षण्मुखवचो रोद्धुं निरीक्ष्याक्षमां
वैलक्ष्याच्चतुरास्यनिष्फलपरावृत्तिश्चिरं पातु वः ॥ ३१ ॥

102 S. 1.23.1 P. 21b

गोनासाय नियोजितागदरजाः सर्पाय बद्धौषधिः
पाणिस्थाय विषाय वीर्यमहते कण्ठे मणिं बिभ्रती ।
भर्तुर्भूतगणाय गोत्रजरतीनिर्दिष्टमन्त्राक्षरा
रक्षत्वद्रिसुता विवाहसमये प्रीता च भीता च वः ॥ ३२ ॥
राजशेखरस्य ॥

(103) S. 1.31.1 (योगेश्वरस्य) P. 26a

दिग्वासा यदि तत्किमस्य धनुषा सास्त्रस्य किं भस्मना
भस्माङ्गस्य किमङ्गना यदि च सा कामं परिद्वेष्टि किम् ।
इत्यन्योन्यविरुद्धचेष्टितमिदं पश्यन्निजस्वामिनो
भृङ्गी सान्द्रशिरावनद्धपरुषं धत्तेऽस्थिशेषं↑ वपुः ॥ ३३ ॥ ↑K. 9a

॥ इति शिवगणव्रज्या ॥ ५ ॥

## ॥ ततो हरिव्रज्या ॥ ६ ॥

104 S. 1.39.2 (नम्रस्य) P. 37a (भट्टनारायणस्य)

अस्ति श्रीस्तनपत्रभङ्गमकरीमुद्राङ्कितोरःस्थलो
देवः सर्वजगत्पतिर्मधुवधूवक्त्राब्जचन्द्रोदयः ।
क्रीडाक्रोडतनोर्नवेन्दुविशदे दंष्ट्राङ्कुरे यस्य भूर्
भाति स्म प्रलयाब्धिपल्वलतलोत्खातैकमुस्ताकृतिः ॥ १ ॥

---

**101** — [a]) S1. 2 जातं ते; S3 जातस्ते; S कापालिकादक्ष (S3 स्व) यः; P कामारिणायं कृतः. — [b]) S3 मुहुर्वाणीं; P शनैर्बाल्याद्. — [c]) KP गौरी-. KP °क्षमा. — [d]) K °वृत्तै°. ○ SG. 1.39; Smk. 2.105. **102** — [a]) P गोनाशाय निवेशिता°. — [b]) SP कंठस्थाय and पाणौ(कंठ). S वीर्यमहतः. S मणीन्. — [c]) P भूतगणेश-. K गोत्रजरती-. ○ Vid. 1.3; Srb. p. 12.33; Smk. 2.36 (राजशेखरस्य); Skb. 3.28; ŚB 1.348, 2.322, 4.456. **103** — [a]) P दिग्वासो. S1. 3 सास्त्रं च; S2 शस्त्रं च; P सांद्रस्य. — [b]) S भस्माथास्य; P भस्माथोस्य. S1. 2 P प्रतिद्वेष्टि; S3 ततो द्वेष्टि. — [c]) S3 °विरोधि-. P चेष्टितमसौ. — [d]) S1.2 P °नद्धवपुषं. ○ Han. 9.37; Sbh. 2399; Prab. 63; Skb. 3.61; ŚB. 2.307. **Vrajyā 5** : Title तद्वर्गव्रज्या at beginning, not शिवगणव्रज्या. **104** ○ Veṇ. 6 end (add. var.); Han. 1.2; Smk. 108.3 (हनुमतः); Smv. 24.7.

पृष्ठभ्राम्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयनान् 105*
निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पान्तु वः । S. 1.38.1
यत्संस्कारकलानुवर्तनवशाद्वेलाच्छलेनाम्भसां (केशटाचार्यस्य)
यातायातमयश्रितं जलनिधेर्नाद्यापि विश्राम्यति ॥ २ ॥ P. 36b
(हनूमतः)

**वाक्पतिराजस्यैतौ ॥**

निष्प्रत्यूहमुपास्महे भगवतः कौमोदकीलक्ष्मणः 106
कोकप्रीतिचकोरपारणपटू ज्योतिष्मती लोचने ।
याम्यामर्धविबोधमुग्धमधुरश्रीरर्धनिद्रायितो
नाभीपल्वलपुण्डरीकमुकुलः कम्बोः सपत्नीकृतः ॥ ३ ॥

विरमति महाकल्पे नाभीपथैकनिकेतनस् 107
त्रिभुवनपुरःशिल्पी यस्य प्रतिक्षणमात्मभूः । P. 27b
किमधिकरणा कीदृक्कस्य व्यवस्थितिरित्यसाव् (anon)
उदरमविशद्द्रष्टुं तस्मै जगन्निधये नमः ॥ ४ ॥

**मुरारेरेतौ ॥**

देवि त्वं कुपिता, ↑ त्वमेव कुपिता कोऽन्यः पृथिव्या गुरुर्, ↑N. 4b 108
माता त्वं जगतां, त्वमेव जगतां माता न विज्ञोऽपरः । T. 20
देवि ↑ त्वं परिहासकेलिकलहेऽनन्ता, त्वमेवेत्यथ ↑T. 12a S. 1.56.1
ज्ञातानन्त्यपदो नमञ् जलधिजां शौरिश्चिरं पातु वः ॥ ५ ॥ (वाक्पतेः)

**वाक्पतिराजस्य ॥**

कोऽयं द्वारि, हरिः, प्रयाह्युपवनं शाखामृगेणात्र किं, 109
कृष्णोऽहं दयिते, बिभेमि सुतरां कृष्णः कथं वानरः । T. 21
मुग्धेऽहं मधुसूदनो, व्रज लतां तामेव पुष्पासवाम् S. 1.56.2
इत्थं निर्वचनीकृतो दयितया ह्रीणो हरिः पातु वः ॥ ६ ॥ (शुभाङ्कस्य)
P. 35a
(गोवर्धनस्य)

---

**105** — [a]) P पृष्ठे. — [d]) P °मतंद्रितं. — [e]) K puts वाक्पतिराजस्य after 104, om. 105, perhaps by mistake. ○ Smv. 24.6; ŚB. 3.54; Sbh. 36; Srb. p. 18.20. **106** — [d]) N may be स पुत्रीकृतः. ○ Anr. 1.1. **107** ○ Anr. 1.2; Smk. 1.33 (मुरारेः). **108** — [b]) S8 वित्तोऽपरः. — [d]) T ज्ञातानंत-; K जातानंतृ-; S ज्ञातानंद-. ○ PG. 284 (हरिहरस्य); Skv. p. 117. **109** — [a]) P प्रयात्युपवनं — [b]) P कृष्णोऽयं. — [c]) K मुग्धोऽइं. S पुष्पान्वितां. — [e]) S1 शुभंकरस्य. ○ Sbh. 104; Sp. 122; Kvv. p. 49; Aś. p. 27; KHA. 495; Sb. 13a; SG. 1.8 (कस्यापि); Srb. p. 24.156; ŚB. 2.475; Nāṭ. ad 99.

110 T. 22 S. 1.57.4 मन्दक्काणितवेणुरह्नि शिथिले व्यावर्तयन् गोकुलं
बर्हापीडकमुत्तमाङ्गरचितं गोधूलिधूम्रं दधत् ।
म्लायन्त्या वनमालया परिगतः श्रान्तोऽपि रम्याकृतिर्
गोपस्त्रीनयनोत्सवो वितरतु श्रेयांसि वः केशवः ॥ ७ ॥ ↑ K. 9b

(111) T. 23 विष्णोर्दानववाहिनीप्रमथनेष्ट्यापूरणायादराद्
आत्तः पाणियुगोदरेण करजश्रेण्या श्रियालम्भितः ।
निर्यातो वदनेन कुक्षिवसतेः पत्युस्तलादर्णसां
शङ्खोऽपत्यपरंपरावृत इव श्रेयांसि पुष्णातु वः ॥ ८ ॥

(112) T. 24 P. 37a (बाणस्य) स जयत्यादिवराहो दंष्ट्रानिष्पिष्टकुलगिरिकसेरुः ।
यस्य पुरः सुरकरिणः साङ्कुरमाषोपमा जाताः ॥ ९ ॥

113 T. 25 जीयासुः शकुलाकृतेर्भगवतः पुच्छच्छटाच्छोटनाद्
उद्यन्तः शतचन्द्रिताम्बरतलं ते बिन्दवः सैन्धवाः ।
यैर्व्यावृत्य पतद्भिरौर्वशिखिनस्तेजोजटालं वपुः
पानाध्मानवशादरोचकरुजश्चक्रे चिरस्यास्पदम् ॥ १० ॥
राजशेखरस्य ॥

(114) T. 26 S. 1.43.3 (वाक्पतेः) कुतस्त्वमणुकः, स्वतः, स्वमिति किं, न यत्कस्यचित्,
किमिच्छसि, पदत्रयं, ननु भुवा किमत्यल्पया ।
द्विजस्य शमिनो मम त्रिभुवनं तदित्याशयो
हरेर्जयति निह्नुतः प्रकटितश्च वक्रोक्तिभिः ॥ ११ ॥

(115) T. 27 S. 1.65.1 (वाक्पतिराजस्य) श्रेयोऽस्याश्चिरमस्तु मन्दरगिरेर्मा घानि पार्श्वैरियं
मावष्टम्भि महोर्मिभिः फणिपतेर्मा लेपि लालाविषैः ।
इत्याकूतजुषः श्रियं जलनिधेरभ्युत्थितां पश्यतो
वाचोऽन्तःस्फुरिता बहिर्विकृतिभिर्व्यक्ता हरेः पान्तु वः ॥ १२ ॥

---

**110** — [a]) T2 S1 मंद्र-; S2 मंत्र-; S3 वक्त्र- (मंद-). T2 संवर्त°. — [c]) K त्रायन्त्या. ○ PG. 256. **111** — [b]) T °युगो हरेण. K श्रियं. — [d]) T शंखे. **112** — [b]) P °गिरिकुल-. **113** ○ Sp. 81; Smk. 1.34 (हनूमतः); Khaṇ. 3 (5); Srb. p. 17.7. **114** T2 S2 अमुकः S1 अनुकः, marg. अणुकः; S3 अनु कं. **115** — [c]) S3 om.

चटच्चटिति चर्मणि च्छमिति चोच्छलच्छोणिते (116) T. 28 S. 1.40.2 (वाक्पतिराजस्य)
धगद्धगिति मेदसि स्फुटरवोऽस्थिषु ष्ठादिति ।
पुनातु भवतो हरेरमरवैरिनाथोरसि
क्वणत्करजपञ्जरक्रकचकाषजन्मानलः ॥ १३ ॥

वाक्पतेरेतौ ॥

वन्दे भुजभ्रमितमन्दरमथ्यमान- 117 T. 29
दुग्धाब्धिदुग्धकणविच्छुरितच्छवीकम् ।
नक्षत्रकर्बुरवियत्प्रतिरोधिनिन्दद्
उन्निद्रकैरवतडागमुरो मुरारेः ॥ १४ ॥

मुरारेः ॥ ↑K. 10a

भ्रमति गिरिराट् पृष्ठे गर्जत्युपश्रुति सागरो (118) T. 30 S. 4.1.2 (चिरंतन-शरणस्य) P. 37b (सरणमेकस्य)
दहति विततज्वालाजालो जगन्ति विषानलः ।
स तु विनिहितग्रीवाकाण्डः कटाहपुटान्तरे
स्वपिति भगवान्कूर्मो निद्राभरालसलोचनः ॥ १५ ॥

भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी (119) T. 31 P. 28a
ध्यानालम्बनतां समाधिनिरतैर्नीते हितप्राप्तये ।
लावण्यस्य महानिधी रसिकतां लक्ष्मीदृशोस्तन्वती
युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः ॥ १६ ॥

पुच्छोदस्तविसारिणो जलनिधेः स्वर्गङ्गया संगम- (120) T. 32
श्रद्धाहूतखलत्पुरातनमुनिर्मीनो हरिः पातु वः ।
यस्मिन्नुद्धरति श्रुतीः पृथुतरादोंकारसारध्वनेर्
मध्येसिन्धु वियन्मयो जलमयस्तम्भस्त्वभूदम्बरे ॥ १७ ॥

---

**116** — [b]) T धगि°. S स्फुटतरो. T ऽस्थिपु. — [d]) S °जन्मा रवः. — [e]) T वाक्पतिराजस्योभौ ○ Śp. 126 (वाक्पतिराजस्य); Smk. 2.77 (वाक्पतिनाथस्य); Khaṇ. 35 (41); Srb. p. 19.48. **118** — [a]) S1 सागरे. — [b]) S1 °जातो. S3 विषाननः. ○ Smk. 108.2 (शरयैकस्य); Shv. A 17a; Khaṇ. 19; Srb. p. 236.4. **119** — [a]) P विलोचन-. — [d]) P तनुतां (कुरुतां). ○ Smk. 2.64 (भागवतामृतदत्तस्य (वचनश्लेषः)); Sbh. 43 (भा° अमृतदत्तस्य); Kpk. 371; Kpd. p. 295; As. ad. 64; Skv. p. 196; Shv. A. 8b. 54 (सारंगस्य); PG. 3 (सारंगस्य); Kvv. p. 50; Sb. 5a (अमृतदत्तस्य); Rasg. p. 488; Amd. 590, 872; Vyk. ad 2.92; KHA 480; Sd. ad 11.8 (p. 196); Srb. p. 15.32. **120** T2 order *cdab.* — [c]) T पृथुतरो (T1 रा) हूंकार-. — [d]) T जलमयः.

(121) T. 33 जृम्भाविजृम्भितदृशः प्रथमप्रबुद्ध-
लक्ष्मीकराम्बुरुहलालनलालसस्य ।
गात्रापवृत्तिभरखर्वितशेषमव्याद्
अव्याहतं मुरजितः कृतकप्रसुप्तम् ॥ १८ ॥

(122) T. 34 मयान्विष्टो धूर्तः स सखि निखिलामेव रजनीम्
इह स्यादत्र स्यादिति निपुणमन्यामभिसृतः ।
न दृष्टो भाण्डीरे तटभुवि न गोवर्धनगिरेर्
न कालिन्द्याः कूले न च निचुलकुञ्जे मुररिपुः ॥ १९ ॥

(123) T. 35 S. 1.52.2 (शतानन्दस्य) श्यामोच्चन्द्रा स्वपिषि न शिशो, नैति मामम्ब निद्रा,
निद्राहेतोः शृणु सुत कथां, कामपूर्वां कुरुष्व ।
रामो नाम क्षितिपतिरभून्माननीयो रघूणाम्
इत्युक्तस्य स्मितमवतु वो देवकीनन्दनस्य ॥ २० ॥

(124) T. 36 S. 1.44.5 (वाक्पतिराजस्य) खर्वग्रन्थिविमुक्तसन्धिविकसद्वक्षःस्फुरत्कौस्तुभं
निर्यन्नाभिसरोजकुड्मलकुटीगम्भीरसामध्वनि ।
पात्रावाप्तिसमुत्सुकेन बलिना सानन्दमालोकितम्
पायाद्वः क्रमवर्धमानमहिमाश्चर्यं मुरारेर्वपुः ॥ २१ ॥

(125) T. 37 S. 1.68.4 (वररुचेः) P. 45a (श्रीव्यासदेवस्य) उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा ↑K. 105
धृत्वा चान्येन वासो विगलितकबरीभारमंशं वहन्त्याः ।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालम्ब्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ॥ २२ ॥

---

**121** — [a]) T विजिह्मित-. — [d]) K अव्याहृतं ○ ŚB. 3.202, 3.284. **122** — [b]) K निपुणसल्या-. — [d]) T पुररिपुः. **123** ○ PG. 151 (सर्वानन्दस्य). **124** ○ Shv. A. 7*a* (हनुमतः); Daś. ad 4.72; Khaṇ. 49; Srb. p. 20.62. **125** — [b]) P धृत्वा. S1.2 °भारमंसं; S °भारमंसे; P °भारमंगं. — [d]) S3 P शय्यामालिंग्य. ○ Veṇ. prol. 6 (some Mss). Sbh. 79 (भट्टनारायणस्य); Śp. 135 (निशानारायणस्य); Skb. 2.332, 5.165; ŚB. 2.271, 3.20, 3.54; SK. 1.125; Vetāl. ed. Uhle p. 161. Ssm. 186; KHA. 736; KHV. 355; Pk. 120; Amd. 515; Vyk. ad 2.10; Srb. p. 16.14.

संपूर्णः पुनरभ्युदेति किरणैरिन्दुस्ततो दन्तिनः 126 T. 38 S. 1.66.1 P. 44a
कुम्भद्वन्द्वमिदं पुनः सुरतरोरग्रोल्लसन्मञ्जरी ।
इत्थं यद्वदनस्तनद्वयवलद्रोमावलीषु भ्रमः
क्षीराब्धेर्मथनेऽभवद्दिविषदां लक्ष्मीरसावस्तु वः ॥ २३ ॥

भभभ्रमति किं मही लललम्बते चन्द्रमाः 127 T. 39 S. 1.48.3 P. 40b
कृकृष्ण ववद द्रुतं हहहसन्ति किं वृष्णयः ।
शिशीधु मुमुमुञ्च मे वववक्त्रमित्यादिकम्
मदस्खलितमालपन् हलधरः श्रियं वः क्रियात् ॥ २४ ॥
पुरुषोत्तमदेवस्य ॥

किं किं, सिंहस्, ततः किं, नरसदृशवपुर्देव, चित्रं गृहीतो, 128* T. 40 S. 1.40.5 (श्रीव्यासपादानाम्)
नैवं, तत्कोऽत्र, जीव, द्रुतमुपनय तं, नन्वयं प्राप्त एव ।
चापं चापं न खड्गं त्वरिततरमहो कर्कशत्वं नखानाम्
इत्थं दैत्याधिराजं निजनखकुलिशैर्जघ्निवान्यः स वोऽव्यात् ॥२५॥ ↑T. 13b

देवस्त्वामेकजङ्घावलयितलगुडो मूर्ध्नि विन्यस्तबाहुर् (129) S. 1.58.3 (योगेश्वरस्य) P. 35b (anon)
गायन् गोयुद्धगीतीरुपरचितशिरःशेखरः प्रग्रहेण ।
दर्पस्फूर्जन्महोक्षद्वयसमररसाबद्धदीर्घानुरागः
क्रीडागोपालमूर्तिर्मुररिपुरवतादात्तगोरक्षलीलः ॥ २६ ॥
श्रीसोन्नोकस्य ॥

जयन्ति निर्दारितदैत्यवक्षसो नृसिंहरूपस्य हरेर्नखाङ्कुराः । (130) S. 1.41.5 P. 38a
विचिन्त्य येषां चरितं सुरारयः प्रियानखेभ्योऽपि रतेषु बिभ्यति ॥ २७ ॥

---

**126** — [b]) P अग्रे लसत्. — [c]) P चलद्रोमावलीसुभ्रमः. — [d]) N ? द्विवषदां. P क्षीरोधेर्. P लक्ष्मीवसारस्तवः. **127** — [a]) S मेदिनी (किं मही). — [b]) S1.2 वृष्टयः; P कृष्णयः. — [c]) K शशीधु; P सिसीधु. T वक्तं; KP वक्तुं (वक्त्रं). S पपपपानपात्र (S3 °त्रे) स्थितं. — [e]) N om. °देव°. ○ SK. 1.106. **128** Lacuna of one folio in T though folio numbers are continuous. — [b]) S धिक्कोऽत्र. S सोऽपि संप्राप्त एव ।. — S3 सज्जं (खड्गं). S झटिति हहहहा. — [d]) S इत्येवं दैत्यराजं. S सोऽवताद्वः॥.○ Smk. 2.76(वाक्पतिनाथस्य); Khaṇ. 34 (28); At. p. 6; KHA. 152; Kvv. p. 6. **129** — [a]) P एकजन्मा-. S1.2 P °लगुडी. — [b]) P शिरःप्रावृतः. — [c]) S °नुबन्धः; P °नुभावः. — [d]) P गोरक्षणीयः. ○ PG. 152 (योगेश्वरस्य). **130** — [c]) P विलोक्य.

(131) S. 1.53.3 (शुभाङ्कस्य) P. 31a

एते लक्ष्मण जानकीविरहिणं मां खेदयन्त्यम्बुदा
मर्माणीव च घट्टयन्त्यलममी क्रूराः कदम्बानिलाः ।
इत्थं व्याहृतपूर्वजन्मविरहो यो राधया वीक्षितः
सेर्ष्यं शङ्कितया स वः सुखयतु स्वप्नायमानो हरिः ॥ २८ ॥

(132) S. 1.68.3

मिथ्याकण्डूतिसाचीकृतगलसरणिर्येषु जातो गरुत्मान्
ये निद्रां नाटयद्भिः शयनफणिफणैर्लक्षिता न श्रुताश्च । ↑K. 11a
ये च ध्यानानुबन्धच्छलमुकुलदृशा वेधसा नैव दृष्टास्
ते लक्ष्मीं नर्मयन्तो निधुवनविधयः पान्तु वो माधवस्य ॥ २९ ॥
राजशेखरस्य ॥

(133) P. 33b

प्रत्यग्रोन्मेषजिह्मा क्षणमनभिमुखी रत्नदीपप्रभाणाम्
आत्मव्यापारगुर्वी जनितजललवा जृम्भितैः साङ्गभङ्गैः ।
नागाङ्कं मोक्तुमिच्छोः शयनमुरुफणाचक्रवालोपधानम्
निद्राच्छेदाभिताम्रा चिरमवतु हरेर्दृष्टिराकेकरा वः ॥ ३० ॥
विशाखदत्तस्य ॥

(134) S. 1.39.1 P. 37a

दंष्ट्रापिष्टेषु सद्यः शिखरिषु न कृतः स्कन्धकण्डूविनोदः
सिन्धुष्वङ्गावगाहः खुरकुहरविशत्तोयतुच्छेषु नाप्तः ।
प्राप्ताः पातालपङ्के न लुठनरतयः पोत्रमात्रोपयुक्ते
येनोद्धारे धरित्र्याः स जयति विभुताविघ्नितेच्छो वराहः ॥ ३१ ॥
वराहमिहरस्य ॥

(135) S. 1.37.4 P. 36a (अपिदेवस्य)

पातु त्रीणि जगन्ति पार्श्वकषणप्रक्षुण्णदिग्मण्डलो
नैकाब्धिस्तिमितोदरः स भगवान् क्रीडाझषः केशवः ।
त्वङ्गन्निष्ठुरपृष्ठरोमखचितब्रह्माण्डभाण्डस्थिते[र्]
यस्योत्स्फालकुतूहलेन कथमप्यङ्गेषु जीर्णायितम् ॥ ३२ ॥
रघुनन्दनस्य ॥

---

